स्तद्धृत्वा वाक्यमब्रवीत् ९५ धारयामास च प्राणान्पतितोपि महीतले उत्तरायणमाविष्ठन्भीष्मः कुरुपितामहः ९६ ततस्त
त्स्य मतमाज्ञाय गंगा हिमवतः सुता महर्षीन्हंसरूपेण प्रेषयामास तत्र वै ९७ ततः संपातिनो हंसाः त्वरिता मानसौकसः आ
जग्मुः सहिता द्रष्टुं भीष्मं कुरुपितामहं ९८ यत्र शेते नरश्रेष्ठः शरतल्पे पितामहः ते तु भीष्मं समासाद्य ऋषयो हंसरूपिणः ९९
अपश्यंश्छरतल्पस्थं भीष्मं कुरुकुलोद्वहं ते तं दृष्ट्वा महात्मानं कृत्वा चापि प्रदक्षिणं १०० गांगेयं भरतश्रेष्ठं दक्षिणे [illegible]
न च भास्करे इतरेतरमामंत्र्य प्राहुस्तत्र मनीषिणः १०१ भीष्मः कथं महात्मा सन्संस्थाता दक्षिणायने इत्युक्त्वा प्रस्थिता हंसा दक्षिणा
मभितो दिशं १०२ संप्रेक्ष्य वै महाबुद्धिश्चिंतयित्वा च भारत तानब्रवीच्छांतनवो नाहं गंता कथंचन १०३ दक्षिणावर्त आदित्ये एत
न्मम मनसि स्थितं गमिष्यामि स्वकं स्थानमासीद्यन्मे पुरातनं १०४ उदगायन आदित्ये हंसाः सत्यं ब्रवीमि वः धारयिष्याम्यहं प्राणा
नुत्तरायणकांक्षया १०५ ऐश्वर्यभूतः प्राणानामुत्सर्गे हि यतो मम तस्मात्प्राणान्धारयिष्ये मुमूर्षुरुदगायने ६ यश्च द
त्तो वरो मह्यं पित्रा तेन महात्मना छंदतो मृत्युरित्येवं तस्य चास्तु वरस्तथा ७ धारयिष्ये ततः प्राणानुत्सर्गे नियते सति इत्युक्त्वा
तांस्तदा हंसानशेते शरतल्पगः ८ एवं कुरूणां पतिते शृंगे भीष्मे महौजसि पांडवाः सृंजयाश्चैव सिंहनादं प्रचक्रिरे ९
तस्मिन्हते महासत्वे भरतानां पितामहे न किंचित्प्रत्यपद्यंत पुत्रास्ते भरतर्षभ १० संमोहश्चैव तुमुलः कुरूणामभवत्तदा कृ
पदुर्योधनमुखा निःश्वस्य रुरुदुस्ततः ११ विषादाच्च चिरं कालमतिष्ठन्विगतेंद्रियाः दध्युश्चैव महाराज न युद्धे दधिरे मनः १२

भी०

३१३

ऊरुग्राहगृहीतास्त्वनाभ्यधावंतपांडवान्अवध्येशांतनोःपुत्रेहतेभीष्मेमहौजसि १३ अभावः सहसाराजन्कुरुराजस्यतर्कितः ह-
तप्रवीरास्कंधपंनिकृत्ताश्चशितैः शरैः १४ कर्तव्यंनाभिजानीमोनिर्जिताः सव्यसाचिना पांडवाश्चजयंलब्धापरत्रचपरांगतिं १५
सर्वेदध्मुर्महाशंखान्शूराः परिघवाहवः सोमकाश्चसपांचालाः प्राहृष्यंतजनेश्वर १६ ततस्तूर्यसहस्त्रेषुनदत्सुसुमहाबलः
आस्फोटयामासभृशंभीमसेनोननादच १७ सेनयोरुभयोश्चापिगांगेयेनिहतेविभो संन्यस्यवीराः शस्त्राणिप्राध्यायंतसमं-
ततः १८ प्राक्रोशन्प्राद्रवंश्चान्येजग्मुर्मोहंतथापरे क्षत्रंचान्येभ्यनिंदंतभीष्मंचान्येभ्यपूजयन् १९ ऋषयःपितरश्चैवप्रशशं-
सुर्महाव्रतं भारतानांचयेपूर्वेतेचैनंप्रशशंसिरे २० महोपनिषदंचैवयोगमास्थायवीर्यवान् जपन्शांतनवोधीमान्का-
लाकांक्षीस्थितोभवत् २१ इतिभीष्मपर्वणि॥ धृतराष्ट्रउवाच कथमासंस्तदायोधाहीनाभीष्मेणसंजय बलिनादेवकल्पे-
नगुर्वर्थेब्रह्मचारिणा १ तैरेवनिहतान्मन्येकुरूनन्यांश्चपांडवैः नप्राहरद्यदाभीष्मोघृणित्वाद्द्रुपदात्मजे २ ततोदुःखत-
तरंमन्येकिमन्यत्प्रभविष्यति अद्याहंपितरंश्रुत्वानिहतंस्मसुदुर्मतिः ३ अश्मसारमयंनूनंहृदयंममसंजय श्रुत्वावि-
निहतंभीष्मंशतधायन्नदीर्यते ४ यदस्मिन्निहतेनाजौभीष्मेजयमिच्छता चेष्टितंकुरुसिंहेनतन्मेकथयसुव्रत ५

पुनः पुनर्नमृष्यामिहंतुंदेवव्रतंरणे नहतोजामदग्न्येनदिव्यैरस्त्रैरयंपुरा ६ सहतोद्रौपदेयेनपांचाल्येनशिखंडिना संजयउवाच
सायाह्नेनिहतोभूमौधार्तराष्ट्रान्विषादयन् ७ पांचालानांददौहर्षंभीष्मः कुरुपितामहः सशेतेशरतल्पस्थोमेदिनीमस्पृशंस्त
दा ८ भीष्मेरथात्प्रपतितेप्रच्युतेधरणीतले हाहेतितुमुलः शब्दोभूतानांसमपद्यत ९ सीमावृक्षेनिपतितेकुरूणांसमितिंजये
सेनयोरुभयोराजन्क्षत्रियान्भयमाविशत् १० भीष्मंशांतनवंदृष्ट्वाविशीर्णकवचध्वजं कुरवः पर्यवर्तंतपांडवाश्चविशां
पते ११ खंतमः संवृतमभूदासीद्भानुर्गतप्रभः ररासपृथिवीचैवभीष्मेशांतनवेहते १२ अयंब्रह्मविदांश्रेष्ठोऽयंब्रह्मविदांव
रः इत्यभाषंतभूतानिशयानंपुरुषर्षभं १३ अयंपितरमाज्ञायकामार्तंशांतनुंपुरा ऊर्ध्वरेतसमात्मानंचकारपुरुषर्षभः १४
इतिस्मशरतल्पस्थंभरतानांमहत्तमं ऋषयस्त्वभ्यभाषंतसहिताः सिद्धचारणैः १५ हतेशांतनवेभीष्मेभरतानांपितामहे न
किंचित्प्रत्यपद्यंतपुत्रास्तवहिमारिष १६ विषण्णवदनाश्चासन्हतश्रीकाश्चभारत अतिष्ठन्व्रीडिताश्चैवह्रियायुक्ताह्यधोमुखाः ६।६
१७ पांडवाश्चजयंलब्ध्वासंग्राममूर्ध्निसंस्थिताः सर्वेदध्मुर्महाशंखान्हेमजालपरिष्कृतान् १८ हर्षात्तूर्यसहस्रेषुवाद्यमानेषु
चानघ अपश्याममहाराजभीमसेनंमहाबलं १९ विक्रीडमानंकौंतेयंहर्षेणमहतायुतं निहत्यसमरेशत्रून्महाबलसमन्वि
ते २० संमोहश्चापितुमुलः कुरूणामभवत्ततः कर्णदुर्योधनौचापिनिःश्वसेतांमुहुर्मुहुः २१ तथानिपतितेभीष्मेकौरवाणांपि

भी०
३१५

तामेह हाहाकृतमभूत्सर्वंनिर्मर्यादमवर्त्तत २२ दृष्ट्वावपतितंभीष्मंपुत्रोदुःशासनस्तव उत्तमंजवमास्थायद्रोणानीकमुपाद्रव
त् २३ भ्रात्रासंस्थापितोवीरःस्वेनानीकेनदंशितः प्रययौपुरुषव्याघ्रःस्वसैन्यंसविषादयन् २४ तमायांतमभिप्रेक्ष्यकुरवःप
र्यवारयन् दुःशासनंमहाराजकिमयंवक्ष्यतीतिच २५ ततोद्रोणायनिहतंभीष्ममाचष्टकौरवः द्रोणस्तत्राप्रियंश्रुत्वामुमोहभर
तर्षभ २६ ससंज्ञामुपलभ्याशुभारद्वाजःप्रतापवान् निवारयामासतदातान्यनीकानिमारिष २७ विनिवृत्तान्कुरून्दृष्ट्वापां
डवापिस्वसैनिकान् दूतैःशीघ्राश्वसंयुक्तैःसमंतात्पर्यवारयन् २८ निवृत्तेषुचसैन्येषुपारंपर्येणसर्वशः निर्मुक्तकवचाःसर्वे
भीष्ममीयुर्नराधिपाः २९ उपरम्यततोयुद्धाद्योधाःशतसहस्रशः उपतस्थुर्महात्मानंप्रजापतिमिवामराः ३० तेतुभीष्मं
समासाद्यशयानंभरतर्षभ अभिवाद्यावतिष्ठंतपांडवाःकुरुभिःसह ३१ अथपांडून्कुरूंश्चैवप्रणिपत्याग्रतःस्थितान् अ
भ्यभाषतधर्मात्माभीष्मःशांतनवस्तदा ३२ स्वागतंवोमहाभागाःस्वागतंवोमहारथाः तुष्यामिदर्शनादहंयुष्माकममरो
पमाः ३३ अभिनंद्यसतानेवंशिरसालंबताब्रवीत् शिरोमेलंबतेत्यर्थमुपधानंप्रदीयतां ३४ ततोनृपाःसमाजह्रुस्त
नूनिचमृदूनिच उपधानानिमुख्यानिनैच्छत्तानिपितामहः ३५ अथाब्रवीन्नरव्याघ्रःप्रहसन्निवतान्नृपान् नैतानिवीर
शय्यासुयुक्तरूपाणिपार्थिवाः ३६ ततोवीक्ष्यनरश्रेष्ठमभ्यभाषतपांडवं धनंजयंदीर्घबाहुंसर्वलोकमहारथं ३७ धनं

राम०
३१५

जयमहाबाहो शिरो मे तात लंबते शीयतामुपधानं वै यद्युक्तमिह मन्यसे ३८ संजय उवाच समारोप्य महच्चापमभिवाद्य पितामहं
नेत्राभ्यामश्रुपूर्णाभ्यामिदं वचनमब्रवीत् ३९ आज्ञापय कुरुश्रेष्ठ सर्वशस्त्रभृतां वर प्रेष्योहं तव दुर्धर्ष क्रियतां किं पितामह ४०
तमब्रवीच्छांतनवः शिरो मे तात लंबते उपधानं कुरुश्रेष्ठ फाल्गुनोपरधत्स्व मे ४१ शयनस्यानुरूपं वै शीघ्रं वीर प्रयच्छ मे त्वं हि पार्थ स
मर्थो वै श्रेष्ठः सर्वधनुष्मतां ४२ क्षत्रधर्मस्य वेत्ता च बुद्धिसत्वगुणान्वितः फाल्गुनोपि तथेत्युक्त्वा व्यवसायमरोचयत् ४२ गृह्या
नुमंत्र्य गांडीवं शरान्संनतपर्वणः अनुमान्य महात्मानं भरतानां महारथं ४३ त्रिभिस्तीक्ष्णैर्महावेगैरनुगृह्णाच्छिरः शरैः अभिप्रा
यंतु विदित्वैव धर्मात्मा सव्यसाचिना ४३ अतुष्यद्भरतश्रेष्ठो भीष्मो धर्मार्थतत्ववित् उपधानेन दत्तेन प्रत्यनंदद्धनंजयं ४४ प्राह स
र्वान्समुद्वीक्ष्य भरतान्भारतं प्रति कुंतीपुत्रं युधां श्रेष्ठं सुहृदां प्रीतिवर्द्धनं ४५ शयनस्यानुरूपं मे पांडवोपहितं त्वया यद्यन्यथा
प्रपद्येथाः शपेयं त्वामहं रुषा ४६ एवमेव महाबाहो धर्मेषु परितिष्ठता स्वप्तव्यं क्षत्रियेणाजौ शरतल्पगतेन वै ४७ एवमु
क्त्वा तु बीभत्सुं सर्वांस्तानब्रवीद्वचः राज्ञश्च राजपुत्रांश्च संगतांस्तानभिसंस्थितान् ४८ पश्यध्वमुपधानं मे पांडवेनाभिसंधितं
शेष्येहमस्यां शय्यायां यावदावर्त्तनं रवेः ४९ ये तदा मां गमिष्यंति ते च प्रेक्ष्यंति मां नृपाः दिशं वैश्रवणाक्रांतां यदा गंता दिवाकरः
५० नूनं सप्ताश्वयुक्तेन रथेनात्तमतेजसा विमोक्ष्येहं तदा प्राणान्सुहृदः सुप्रियानिव ५१ परिखा खन्यतामत्र ममावसदने

भि०
३१५

न्नृपाः उपाशिष्येविवस्वंतमेवंशरशताचितः ५१ उपारमध्वंसंग्रामाद्वैरमुत्सृज्यपार्थिवाः संजयउवाच उपातिष्ठन्नथोवैद्याः
शल्योद्धरणकोविदाः ५२ सर्वोपकरणैर्युक्ताः कुशलैः साधुशिक्षिताः तान्दृष्ट्वाजाह्नवीपुत्रः प्रोवाचतनयंतव ५३ दानंदत्वा
विसर्ज्यंतांपूजयित्वाचिकित्सकाः एवंगतेमयेदानींवैद्यैः कार्यमिहास्तिकिं ५४ क्षत्रधर्मप्रशस्तांहिप्राप्तोस्मिपरमांगतिं नैष
धर्मोमहीपालाः शरतल्पगतस्यमे ५५ एभिरेवशरैश्चाहंदग्धव्योस्मिनराधिपाः तच्छ्रुत्वावचनंतस्यपुत्रोदुर्योधनस्तव ५६ वैद्या
न्विसर्जयामासपूजयित्वायथार्हतः ततस्तेविस्मयंजग्मुर्नानाजनपदेश्वराः ५७ स्थितिंधर्मेपरांदृष्ट्वाभीष्मस्यामिततेजसः उप
धानंततोदत्वापितुस्तेमनुजेश्वराः ५८ सहिताःपांडवाःसर्वेकुरवश्चमहारथाः उपगम्यमहात्मानंशयानंशयनेशुभे ५९ ते
भिवाद्यततोभीष्मंकृत्वाचापिप्रदक्षिणं विधायरक्षांभीष्मस्यसर्वएवसमंततः ६० वीराःस्वशिबिराण्येवध्यायंतः परमातु
राः निवेशायाभ्युपागच्छन्सायाह्नेरुधिरोक्षिताः ६१ निविष्टान्पांडवांश्चैवप्रीयमाणान्महारथान् भीष्मस्यपतनेहृष्टानुपग
म्यमहाबलः ६२ उवाचमाधवः कालेधर्मपुत्रंयुधिष्ठिरं दिष्ट्याजयसिकौरव्यदिष्ट्याभीष्मोनिपातितः ६३ अवध्योमानुषै
रेवसत्यसंधोमहारथः अथवादैवतैः सार्द्धंसर्वशास्त्रस्यपारगः ६४ त्वांतुचक्षुर्हणंप्राप्यदग्धोघोरेणचक्षुषा एवमुक्तोध
र्मराजः प्रत्युवाचजनार्दनं ६५ तवप्रसादाद्विजयः क्रोधात्तवपराजयः त्वंहिनःशरणंकृष्णभक्तानामभयंकरं ६६ अनाश्चर्योजयस्ते रम०
षांयेषां ३१५

त्वमसिकेशव रक्षितासमरेनित्यंनिरस्यचापिहितेरतः ६७ सर्वथात्वांसमासाद्यनाश्चर्य्यमितिमेमतिः एवमुक्तःप्रत्युवाचस्म
यमानोजनार्दनः ६८ नैवैवेतद्युक्तरूपंवचनंपार्थिवोत्तम इतिभीष्मपर्वणि संजयउवाच व्युष्टायांतुमहाराजशर्व्वर्य्यांस
र्व्वपार्थिवाः पांडवाधार्त्तराष्ट्राश्चउपातिष्ठन्पितामहं १ तंवीरशयनेवीरंशयानंकुरुसत्तम अभिवाद्योपतस्थुर्वैक्षत्रि
याः क्षत्रियर्षभं २ कन्याश्चंदनचूर्णैश्चलाजैर्माल्यैश्चसर्व्वशः अवाकिरंछांतनवंतत्रगत्वासहस्रशः ३ स्त्रियोवृद्धास्त
थाबालाः प्रेक्षकाश्चपृथग्जनाः समभ्ययुः शांतनवंभूतानीवतमोनुदं ४ तूर्याणिगणसंख्यानितथैवनटनर्त्तकाः शि
ल्पिनश्चतथाजग्मुः कुरुवृद्धंपितामहं ५ उपारम्यचयुद्धेभ्यः सन्नाहान्विप्रमुच्यते आयुधानिचनिक्षिप्यसहिताःकुरुपांडवाः ६ पनिः ६
अन्वासंतदुराधर्षंदेवव्रतमरिंदमं अन्योन्यंप्रीतिमंतस्तेयथापूर्वंयथावयः ७ सापार्थिवशताकीर्णासमितिर्भीष्मशो
भिता शुशुभेभारतीदीप्तादिवीवादित्यमंडलं ८ विबभौचनृपाणांसागंगासुतमुपासतां देवानामिवदेवेशंपितामहमु
पासतां ९ भीष्मस्तुवेदनांधैर्यान्निगृह्यभरतर्षभ अभितप्तःशरैःश्चैवनिश्वसन्नुरगोयथा १० शराभितप्तकायोपिश
स्त्रसंपातमूर्छितः पानीयमितिसंप्रेक्ष्यराज्ञस्तान्प्रत्यभाषत ११ ततस्तेक्षत्रियाराजन्समाजह्रुःसमंततः भक्ष्यानुच्चा
वचान्राजन्वारिकुंभांश्चशीतलान् १२ उपानीतंतुपानीयंदृष्ट्वाशांतनवोब्रवीत् नाद्यातीतामयाशक्याभोगाः केचनमा
नुषाः १३ अपक्रांतोमनुष्येभ्यः शरशय्यांगतोस्म्यहं प्रतीक्षमाणस्तिष्ठामिनिवृत्तिंशशिसूर्ययोः १४ ॥

भी०
३१६

एवमुक्त्वाशांतनवोविनिर्दश्वाकेनपार्थिवान् अर्जुनंतुमहाबाहुमिदंवचनमब्रवीत् १५ अर्थोपिसमहाबाहुरभिवाद्यपिताम
हं अतिष्ठत्प्रांजलिःप्रह्वःकिंकरोमीतिचाब्रवीत् १६ तंदृष्ट्वापांडवंराजन्नभिवाद्याग्रतःस्थितं अभ्यभाषतधर्मात्माभीष्मः
प्रीतोधनंजयं १७ दह्यतीवशरीरंमेसंवृतस्यतवेषुभिः मर्माणिपरिदूयंतेमुखंचपरिशुष्यति १८ वेदनार्तशरीरस्यप्रयछा
पोममार्जुन त्वंहिशक्तोमहेष्वासदातुमापोयथाविधि १९ अर्जुनस्तुतथेत्युक्त्वारथमारुह्यवीर्यवान् अधिज्यंबलवत्कृ
त्वागांडीवंव्याक्षिपद्धनुः २० तस्यज्यातलनिर्घोषंविस्फूर्जितमिवाशनेः वित्रेसुःसर्वभूतानिश्रुत्वाचपार्थिवाः २१
ततःप्रदक्षिणंकृत्वारथेनरथिनांवरः शयानंभरतश्रेष्ठंसर्वशस्त्रभृतांवरं २२ संधायचशरंदीप्तमभिमंत्र्यसपांडवो
ः पर्जन्यास्त्रेणसंयोज्यसर्वलोकस्यपश्यतः २३ अविध्यत्पृथिवींपार्थःपार्श्वेभीष्मस्यदक्षिणे उत्पपाततताधारा
वारिणोविमलाशुभा २४ शीतस्यामृतकल्पस्यदिव्यगंधरसस्यच अतर्पयत्ततःपार्थःशीतयाजलधारया २५ भी
ष्मंकुरूणामृषभंदिव्यकर्मपराक्रमं कर्मणातेनपार्थस्यशक्रस्येवविकुर्वतः २६ विस्मयंपरमंजग्मुस्ततस्तेव
सुधाधिपाः तत्कर्मप्रेक्ष्यबीभत्सोरतिमानुषविक्रमं २७ संप्रावेपंतकुरवोगावःशीतार्दितादिव विस्मयाच्चोत्तरीया राम०
णिव्याविध्यन्सर्वतोनृपाः २८ शंखदुंदुभिनिर्घोषस्तुमुलःसर्वतोभवत् ततःशांतनवस्तुष्टोविराजन्बीभत्सुमब्र ३१६
वीत् २९ सर्वपार्थिववीराणांसन्निधौमृजय…निव नैतच्चित्रंमहाबाहोत्वयिकौरवनंदन ३० कथितोनारदेनासि

पूर्वोपिरमितद्युते वासुदेवसहायस्त्वंमहत्कर्मकरिष्यसि ३१ येचान्येहित्रिदेवेंद्राः सहदेवैरपिध्रुवं विदुस्त्वांनिधनंपार्थसर्वेस्यत्रस्यतद्धिदः
३२ धनुर्द्धराणामेकस्त्वंपृथिव्यांप्रवरोनरषु मनुष्याजगतिश्रेष्ठाः पक्षिणांपन्नगेश्वरः ३३ सरितांसागरश्रेष्ठः श्रेष्ठस्त्वमसिधन्विनां
नैवस्मृतंधार्त्तराष्ट्राणांवाक्यंमयाश्रमानंविदुरेणचैव ३४ द्रोणानरोमरराजनार्द्दनेनर्मुक्ताः संजयेनापिचोक्तं पीतवुद्धिर्हिविमंत्रक
ल्योदुर्योधनोनचतच्छ्रद्दधाति ३५ सशेष्यतेचैनिहतःक्षिरायवशात्सोगोभीमबलाभिभूतः एतच्छ्रुत्वातद्वचः कौरवेंद्रोदुर्योधनोदी
नमनाबभूव ३६ तमब्रवीद्धांतनवोभिवीक्ष्यनिबोधराजन्नभवचीतमन्युः दृष्टंदुर्योधनेनत्वेययथापार्थेनधीमता ३७ जलस्यधा
राजनिताशीतस्यामृतगंधिनः एतस्यकर्त्तालोकेस्मिन्नान्यःकश्चनविद्यते ३८ आग्नेयंवारुणंसौम्यंवायव्यमथवैष्णवं ऐंद्रंपाशु
पतंब्राह्मंपारमेष्ठ्यंप्रजापतेः ३९ धातुस्त्वष्टुश्चसवितुर्वैवस्वतमथापिव सर्वस्मिन्मानुषेलोकेवसेकोहिधनंजयः ४० कृष्णोवादेवकी
पुत्रोनान्योवैरेहकश्चन अशक्यः पांडवस्तातयुद्धेजेतुंकथंचन ४१ अमानुषाणिकर्माणियस्यैतानिमहात्मनः तेनसत्ववतासं
ख्येशूरेणाहवशोभिना ४२ कृतेनासमरेराजन्संधिर्भवतुमाचिरं यावत्कृष्णोमहाबाहुःस्वाधीनः कुरुसत्तम ४३ तावत्पार्थेनशू
रेणसंधिस्तेतातयुज्यतां यावन्नतेचमूः सर्वाः शरैः सन्नतपर्वभिः ४४ नाशयत्यर्जुनस्तावत्तत्संधिस्तेनतातयुज्यतां यावत्तिष्ठंति
समरेहतशेषाः सहोदराः ४५ नृपाश्चबहवोराजंस्तावत्संधिःप्रयुज्यतां नानिर्दहतितेयावत्क्रोधदीप्तेक्षणश्चमूं ४६ युधिष्ठिरो

भी०
३१७

रोतावत्संधिस्तेनात्नयुज्यतां नकुलः सहदेवश्च भीमसेनश्च पांडवः ४७ यावच्चमूं महाराजनाशयंतिन सर्व्वशः तावत्तेपांडवैर्वीरैः
सौहार्द्दंममरोचते ४८ युद्धं मदंतमेवास्तु तात संसाम्य पांडवैः एतत्ते रोचतां वाक्यं यदुक्तोसि मया नघ ४९ एतत्क्षेममहंमन्ये तव वै चै
वकुलस्य च त्यज्यतां मन्युमुपशाम्यन्तु पार्थिवाः पर्याप्तमेतद्यत्कृतं फाल्गुनेन ५० भीष्मस्यांतादस्तु वः सौहृदं च जीवंतु शेषाः
साधुराजन्प्रसीद राज्यं स्वार्द्धं दीयतां पांडवानां मिंद्रप्रस्थं धर्मराजोभिपातु ५१ मामित्रध्रुक्पार्थिवानां जघन्यः पापाकीर्त्तिप्रा
प्स्यसे कौरवेंद्र ममावसानाच्छांतिरस्तु प्रजानां संगच्छंतां पार्थिवाः प्रीतिमंतः ५२ पिता पुत्रं मातुलं भागिनेयो भ्राता चैव भ्रातरं मैतु
राजन् नचेदेवं प्राप्तकालं वचो मे मोहाविष्टः प्रतिपत्स्यस्यबुध्या ५३ तप्स्यसे त्वं एतदंताः स्थ सर्व्वे सत्यामेतां भारतीमीरयामि ए
तद्वाक्यं सौहृदादापगेयो मध्ये राज्ञां भारतं श्रावयित्वा ५४ तूष्णीमासीच्छल्यसंतप्तमर्म्मायोज्यात्मानं वेदनां संनियम्य संजय उवाच
धर्मार्थसहितं वाक्यं श्रुत्वाहितमनामयं ५५ नारोचयत पुत्रस्ते मुमूर्षुरिव भेषजं इति भीष्मपर्व्वणि संजय उवाच ततस्ते पार्थि
वाः सर्व्वे जग्मुः स्वान्यालयान्पुनः तूष्णींभूते महाराज भीष्मे शांतनुनंदने १ श्रुत्वा तु निहतं भीष्मं राधेयः पुरुषर्षभः ईषदागत
संत्रासः सत्वरोपजगाम ह २ स ददर्श महात्मानं शरतल्पगतं तदा जन्मशय्यागतं वीरं कार्त्तिकेयमिव प्रभुं ३ निमीलिताक्षं तं
वीरं साश्रुकंठस्तदा वृषः भीष्म भीष्म महाबाहो प्रत्युवाच महाद्युतिः ४ राधेयोहं कुरुश्रेष्ठ नित्यमक्षिगतस्तव द्वेष्योहं त

राम०
३१७

वत्सस्वेत्र इति चैनमुवाच ह ५ ततःफुल्लाकुरुवृद्धो हि बलिसंरक्तलोचनः शनैरुद्वीक्ष्य सस्नेहमिदंवचनमब्रवीत् ६ एहीतेविक्षमा
लोकासमुत्सार्य्यचरक्षिणः पितेवपुत्रंगांगेयः परिरभ्यैकपाणिना ७ एह्येहिमेविप्रतीपस्पर्द्धसेत्वंमयासह यदिमांनाधिग
च्छेथानतेश्रेयोध्रुवंभवेत् ८ कौंतेयस्त्वंनराधेयोनतवाधिरथःपिता कृतस्त्वंहिमहाबाहोविदितोनारदान्मया ९ कुर्सहेपा
प नाद्यैवनचसत्यंनसंशयः नचद्वेषोस्तिमेतातत्वयिसत्यंब्रवीमिते १० तेजोवधनिमित्तंतुपरुषंत्वाहमब्रुवं अकस्मात्पां
डवान्सर्वानावक्षिपसिसुव्रत ११ येनासिबहुशोराज्ञाचोदितःसूतनंदन जातोसिधर्मलोपेनततस्तेबुद्धिरीदृशी १२ नी
चाश्रयान्मत्सरेणद्वेषिणीगुणिनामपि तेनासिबहुशोरूक्षंश्रावितःकुरुसंसदि १३ जानामिसमरेवीर्यंशत्रुभिर्दुःसहंभुवि
ब्रह्मण्यतांचशौर्यंचदानेचपरमांस्थितिं १४ नत्वयासदृशःकश्चित्पुरुषेष्वमरोपमः कुलभेदभयाच्चाहंसदापरुषमुक्तवा
न् १५ इष्वस्त्रेचास्त्रसंधानेलाघवेस्त्रबलेतथा सदृशःफाल्गुनेनासिकृष्णेनचमहात्मना १६ कर्णकाशिपुरंगत्वात्वयैके
नधनुष्मता कन्यार्थेकुरुराजस्यराजानोमृदितायुधि १७ तथाचबलवान्राजाजरासंधोदुरासदः समरेसमरश्लाघीनत्वया
सदृशोभवत् १८ ब्रह्मण्यःसत्यवादीचतेजसार्कइवापरः देवगर्भसमःसंख्येमनुष्यैरधिकोयुधि १९ व्यपनीतोद्यमन्युर्मे
यस्त्वांप्रतिपुराकृतः दैवंपुरुषकारेणनशक्यमतिवर्तितुं २० सोदर्याःपांडवावीराभ्रातरस्तेरिसूदन संगच्छतैर्महाबाहो
ममचेदिच्छसिप्रियं २१ मयाभवतुनिर्वृत्तंवैरमादित्यनंदन पृथिव्यांसर्वराजानोभवंत्वद्यनिरामयाः २२ कर्णउवाच

सूर्य ५

भी० ज्ञानाम्येवमहाबाहोसर्वमेतन्नसंशयः यथावदसिमेभीष्मकौंतेयोहंनसूतजः २३ अवकीर्णस्त्वहंकुंत्यासूतेनचविवर्द्धि
३१८ तः भुक्त्वादुर्योधनैश्वर्यंनमिथ्याकर्तुमुत्सहे २४ वसुदेवसुतोयद्वत्पांडवायदृढव्रतः वसुचैवशरीरंचपुत्रदारांस्तथायशः
२५ सर्वंदुर्योधनस्यार्थेत्यक्तंमेभूरिदक्षिण माचैतद्व्याधिमरणंक्षत्रंस्यादितिकौरव २६ कोपिताःपांडवाःनित्यंममा
श्रित्यसुयोधनं अवश्यभावीह्यर्थोयंयोनशक्योनिवर्तितुं २७ दैवंपुरुषकारेणकोनिवर्तितुमुत्सहेत् पृथिवीक्षय
शंसीनिमित्तानिपितामह २८ भवद्भिरुपलब्धानिकथितानिचसंसदि पांडवावासुदेवश्चविदितामममसर्वशः २९
अजेयाःपुरुषैरन्यैरितितांश्चोत्सहामहे विजयिष्येरणेपांडूनितिमेनिश्चितंमनः ३० नचेच्छक्यमवस्रष्टुंवैरमेतत्सुदारुणं
धनंजयेनयोत्स्येहंस्वधर्मप्रीतमानसः ३१ अनुजानीष्वमांतातयुद्धायकृतनिश्चयं अनुज्ञातस्त्वयावीरयुध्येयमितिमेमतिः
३२ दुरुक्तंविप्रतीपंवारभसाचापलात्तथा यन्मयेहकृतंकिंचित्तन्मेत्वंक्षंतुमर्हसि ३३ भीष्मउवाच नचेच्छक्यमवस्र
ष्टुंवैरमेतत्सुदारुणं अनुजानामिकर्णत्वांयुध्यस्वस्वर्गकाम्यया ३४ विमन्युर्गतसंरंभःकृतकर्मारणेस्मह यथाशक्तिय
थोत्साहंसतांवृत्तेषुवृत्तवान् ३५ अहंत्वामनुजानामियदिच्छसितदाप्नुहि क्षत्रधर्मजितांल्लोकानवाप्स्यसिधनंजयात् ३६ राम०
युध्यस्वनिरहंकारोबलवीर्यव्यपाश्रयः धर्म्याद्धियुद्धाच्छ्रेयोन्यत्क्षत्रियस्यनविद्यते ३७ प्रशमेहिकृतोयत्नःसुमहान्सुचि ३१८
रंमया नचैवशकितःकर्तुंकर्णसत्यंब्रवीमिते ३८ संजयउवाच इत्युक्तवतिगांगेयेअभिवाद्यप्रसाद्यच राधेयोरथमा

भी०
३१९

हृद्यप्रायान्नवसुंतंप्रति ३९ इतिश्रीमहाभारतेशतसहस्रांसंहितायांवैय्यासिक्यांभीष्मपर्वणिभीष्मपर्वसमाप्तं
शुभमस्तु ॥ ॥ संवत १८ ३० मीतिवैशाषसुदि ६ वासेरे भौमपुस्तकिसमाप्तः लिषंतंश्रीशनलालकायथ

राम०
३१९

नीलप्रवं
३१८

नेपाल ... ३१८

[illegible]